## अध्याय :- ४० chapter-40

अर्जुन उवाच ।।

[1]महाकालस्त्वसौ कश्च कथं सिद्धिमुपागतः ।।
अस्मिंस्तीर्थे मुनिश्रेष्ठ महदाश्चर्यमत्र मे ।। १

सर्वमेतत्समाख्याहि श्रद्धानाय पृच्छते ।। २

नारद उवाच ।।[2]
नमस्कृत्य महाकालं वरदं स्थाणुमव्ययम् ।।
शक्तितश्चरितं तस्य वक्ष्ये पांडुकुलोद्वह ।। ३

वाराणस्यां पुरि पुरा बभूव जपतां[3] वरः ।।
रुद्रजापी महाभागो मांटिर्नाम महायशाः ।। ४

तस्यापुत्रस्य पुत्रार्थे रुद्रान्संजपतः किल ।।
गतं वर्षशतं तुष्टस्ततस्तं प्राह शंकरः ।। ५

मांटे तव सुतो धीमान्मत्प्रभाव पराक्रमः ।।
वंशस्य तव सर्वस्य समुद्धर्ता भविष्यति ।। ६

इति श्रुत्वा रुद्रवचो मांटिर्हर्ष परंगतः ।।
ततः काले कियन्मात्रे पत्नीमांटिर्महात्मनः ।। ७

---

१ ब. माहाकाल

२ ब अ. श्री नारद ।।

३ अ. जयतां

दधार गर्भं चटिका तपोमूर्तिधरा यथा ॥
तस्य गर्भस्य वर्षाणि [1]चत्वारि किल संयुयुः ॥ ८

न पुनर्मातुरुदरं त्यक्ता निर्गच्छते बहिः ॥
ततो मांटिरुपामंत्र्य सामभिस्तमवोचत ॥ ९

वत्स सामान्य पुत्रोऽपि पित्रोः सुखकरः[2] सदा ॥
शुद्धायां मातरि भवोमत्तः किं पीडयस्यलम् ॥ १०

वत्स मानुष्यवासस्य स्पृहा तुभ्यं कथं न हि ॥
यत्र धर्मार्थकामानं मोक्षस्यापि च संततिः[3] ॥ ११

कदा मनुष्या जायेम पूजा यत्र महाफला ॥
पितृणां देवतानां च नानाधर्माश्चैव यत्र हि ॥ १२

इति भूतानि शोचंति नानायोनिगतान्यपि ॥
तत्त्वं मानुष्यमतुलं स्पृहणीयं दिवौकसाम् ॥ १३

गर्भ उवाच ॥[4]
ब्रतात[5] जानाम्यहं सर्वमेतत्परम दुर्लभम् ॥
किं तु बिभेमि चाति मात्रं कालमार्गस्य नित्यशः ॥ १४

---

१ अ. किल ब चत्वारि इति स्यात्
२ ब. प्रतौ एतत्स्थाने संपूजकाः इति पठयते ।
३ अ. संगतिः
४ ब. गर्भ उ० ॥
५ ब. ताता

551
551

द्वौ मार्गौ किल वेदेषु प्रोक्तौ कालोर्चिरेव च ।।
अर्चिषा मोक्षमायांति[१] कालमार्गेण कर्मणि ।। १५

स्वर्गे वा नरके वापि कालमार्गगतो ह्ययम् ।।
न शर्म लभते क्वापि व्याधविद्धमृगो यथा ।। १६

तस्यैव हेतोः प्रयतेत्कोविदो यन्न दुःखवित् ।।
कालेन घोररूपेण गंभीरेण समाहितः[२] ।। १७

तच्चेन्मम मन्स्तात [३]नानादोषैर्न मोह्यते ।।
ततोऽहं दुर्लभं जन्म मानुष्यं शीघ्रमाप्नुयाम् ।। १८

ततस्तस्य पिता पार्थ कांदिशीको महेश्वरम् ।।
जगाम शरणं देवं त्राहित्राहि महेश्वरम् ।। १९

त्वां विना कोऽपरोदेव पुत्रस्याभीष्टदोऽस्ति मे ।।
*४ त्वयैव दत्तस्त्वं चामुं जन्म प्रापय मे सुतम् ।। २०

ततस्तस्याति भक्तयासौ प्राह तुष्टो महेश्वरः ।।
विभूतीः स्वाधर्मज्ञान वैराग्यैश्वर्यमेव च ।। २१

---

१ अ. मनक्षीणायां
२ अ. समाहते ब. समीहते
३ अ. 'नाना......ते' श्लोकार्घं नास्ति ।
* ४ अ. प्रती श्लोकं लुप्तम् (त्वयैव...... सुतम् )

विपरीतश्च शीघ्रं भो मांटिपुत्रः प्रबोध्यताम् ।।
ततस्ता द्योतयंत्यश्च विभूत्यो गर्भमूचिरे ।। २२

महामते मांटिपुत्र न धार्यं ते भयं त्वदि ।।
चत्वारस्त्वां हि धर्माधा मनस्त्यक्ष्यामहे न ते ।। २३

ततोऽपरास्त्वधर्माधाः प्रोचुर्नैव तथा वयम् ।।
भविष्यामो मनस्तुभ्यमस्मत्तव भयं न हि ।। २४

इत्युक्ते स विभूतीभिः शीघ्रमेव कुमारकः ।।
निः संसार बहिर्जातिश्च कंपेतिरुरोद च[1] ।। २५

ततो विभूतयः प्राहुर्मांटे तव सुतस्त्वसौ ।।
अद्यापि कालमार्गस्य भीतः कम्पति रोदिति ।। २६

कालभीतिरिति ख्यातस्तस्मादेष भविष्यति ।।
इति दत्वा वरं ताश्च महादेवांतिकं ययुः ।। २७

सोऽपि बालः प्रववृधे शुक्लपक्ष इवोडुपः ।।
*२ संस्कृतः स च संस्कारैर्धीमान्पशुपतिव्रती ।। २८

---

१ 'च' ब. प्रतौ नास्ति
*२ 'संस्कृतः सच संस्कारै' इदमर्ध अ. पुस्तके लुप्तम् ।।

पंचमात्रान्जपंछुद्वस्तीर्थयात्रापरा भवत् ।।
रुद्रक्षेत्रेषु सस्नौ स जपन्मंत्राश्रवं भारत ।। २९

कालभीति गुप्तक्षेत्रगुणांछुत्वाभ्युपाययौ ।।
स्नात्वा ततो महीतीये जप्त्वा मंत्रांश्रवं कोटिशः ।। ३०

निवृत्तो नातिदूरेथ बिल्ववृक्षं ददर्श सः ।।
दृष्ट्वा तं तस्य चाधस्ताल्लक्षमेकं जजाप सः ।। ३१

अ जप तस्तस्य विप्रस्य इंद्रियाणि लयं ययुः ।।
केवलं परमानंदस्वरूपो सावभूत्क्षणात् ।। ३२

तस्यानंदस्य नौपम्यं स्वर्गादीनां भवेत्क्वचित् ।।
गंगोदक स्येवमानं केवलं सो प्यसावपि ।। ३३

तत्र लीनो[1] मुहूर्तेन पुनश्रवाभूद्यशा पुरा[2] ।।
ततो विसिष्मिये पार्थ कालभितिरुवाच ह ।। ३४

नायं मम महानन्दो वाराणस्यां न नमिषे[3] ।।
न प्रभासे न केदारे न चाप्यमरकण्टके[4] ।। ३५

---

१ ब. नीलो

२ ब. प्रतौ 'पुरायथा' इतिस्यात्

३ अ. नैमिषे

४ अ. कंकटे

श्री ‿पर्वते न चान्यत्र यादृशोद्य प्रवर्तते ।।
निर्विकाराणि स्वच्छानि गंगाभांसीवखानि मे ।। ३६

भूतेषु परमा प्रीतिस्त्रि जगदयोतते स्फुटम् ।।
धर्ममेकं परं मह्यं चेतश्श्रेयाप्यवगच्छति ।। ३७

अहो स्थानप्रभावोऽयं स्फुटं चाप्यत्र प्रोच्यते ।।
निर्दोषं यच्छुचि स्थान सर्वोपद्रववर्जितम् ।। ३८

तत्र स्थितस्य धर्मार्थस्तद्वद्भूयात्सहस्त्रधा ।।
तदस्माच्च प्रभावाद्धि जानामीतः स्वचेतसि ।। ३९

विशिष्टं काशिमुख्येभ्यस्तीर्थेभ्यः स्थानकं ‿त्विदम् ।।
तस्मादत्रैव संस्थोहं[१] तपस्तप्स्यामि पुष्कलम् ।। ४०

इदं चेदं तीर्थमिति सदा यस्तुषितश्चरेत् ।।
न स सिद्धिमवाप्नोति क्लेशैनैव म्रियते सः ।। ४१

इति संचिंत्य बिल्वस्य[२] वृक्षस्याधो व्यवस्थितः ।।
जजापमन्त्रानुद्रस्य अंगुष्टाग्रेण धिष्ठितः ।। ४२

---

१ ब. संस्थानं
२ ब. विल्वस्य

गृहीत्वा नियमं तोयबिंदुं वर्षशतेऽग्निवत् ।।
ततो वर्षशते याते जपतस्तस्य भारत ।। ४३

कश्चिच्चतोयभृतं कुम्भं गृहीत्वा नर आव्रजत् ।।
स तं प्रणम्य प्राहेदं कालभीतिं प्रहर्षतः[१] ।। ४४

अद्य ते नियमः पूर्णस्तोयमेतन्महामते ।।
गृहाण सफलं मह्यं श्रमं कर्तुमिहार्हसि ।। ४५

कालभीतिरुवाच ।।[२]
को भवान्वर्णतो ब्रूहि किमाचारश्च तत्त्वतः ।।
जन्माचारौ विदित्वा ते ग्रहीष्याम्यन्यथा नहि ।। ४६

नर उवाच ।।[३]
न जाने पितरौ स्वीयौ नष्टौ वा सर्वथा न हि ।।
एवमेवापि पश्यामि सर्वदाऽहं स एव च ।। ४७

आचारैश्चापि धर्मैश्च न कार्यं मम किंचन ।।
तस्माद्वक्ष्यामि नाप्येतन्न चाप्यस्मि समाचरे ।। ४८

कालभीतिरुवाच ।।[४]
यद्येवं नोदकं तुभ्यं ग्रहीष्याम्यस्मि कर्हिचित् ।।
श्रृणुष्वात्र वचो यन्मे गुरुराह श्रुतिरितम् ।। ४९

---

१ अ. ब. प्रहर्षितः
२ अ. कालभीति ।। (उवाच नास्ति)
३ अ. नर ।। "
४ अ. कालभीति ।। "

न ज्ञायते कुलं यस्य बीन शुद्धिं विना ततः ।।
तस्य खादन्पिबन्वापि साधुः सीदति तत्क्षणात् ।। ५०

यश्च रुद्रं न जानाति [1]रुद्रभक्तश्च यो न हि ।।
अन्नोदकं तस्य भुञ्जपातकी स्यान्न संशयः ।। ५१

अज्ञात्वा यः शिवं भुंक्ते कथ्यते सोऽत्र ब्रह्म हा ।।
मार्ष्टि च ब्रह्महान्नादे तस्मात्तस्य न भक्षयेत् ।। ५२

गंगोदकुम्भः स्याद्यद्वत्तन्मध्ये मद्य बिंदुना ।।
अशिवज्ञस्य यो भुंक्ते शिवज्ञोऽपि तथैव सः ।। ५३

हीनवर्णश्च यः स्याद्धि शिवभक्तोऽपि नैव सः ।।
प्रतिगृहयौ गुणौ तस्माद्विलोक्यौ द्वौ प्रतिगृहे ।। ५४

नर उवाच [2] ।।
एतेन तव वाक्येन हास्यं संजायते मम ।।
अहो मुमुक्षोऽसि मिथ्या त्वमपस्मारीजडोऽपि च ।। ५५

सदा सर्वेषु भूतेषु शिवो वसति नित्यशः ।।
साध्वसाधु ततो वाक्यं नैव निन्दा शिवस्य सा ।। ५६

---

१ अ॰ रुद्र....... हि इदमर्ध लुप्तम् ।
२ अ॰ नर ।।

आत्मनश्च परस्यापि यः करोत्यंतरो दरम् ।।
तस्य भिन्नदशो मृत्युर्विदधे भयमुल्बणम् ।। ५७

अथवा [1]का हि पानीये भवेदशुचिता वद ।।
मृत्तिकोद्भवकुम्भो ऽयं पावकेनापि पाचितः ।। ५८

पूर्णश्च पयसा कस्मिन्नेषामशुचिता कृतः ।। ५९

अथ चेन्मम संसर्गादि शुचित्वं च मीयते ।।
तदस्यां संस्थितः पृथ्व्यामहं त्वं च कुतोवद ।। ६०

कुतः पृथिव्यां चरसि खे त्वं नैव चरस्युत ।।
एवं विचार्यमाणे ते भाषितं मुग्धवद्भवेत् ।। ६१

कालभीतिरुवाच ।। [2]
सर्व भूतेषु चेदेवं शिव एवेति चोच्यते ।।
नास्तिकां मृत्तिका कस्मादभक्षयंति न भस्यके ।। ६२

शुद्धयर्थं तेन विश्वस्य स्थापिता संस्थितिर्यथा ।।
फलेन पालिता सा च नान्यथा तां शृणुष्व च ।। ६३

---

१ ब. कास्ति
२ ब अ. ब. काल भीति ।।

ससर्जेति पुरा धाता रूपात्मकमिदं जगत् ।।
तच्च नामप्रपंचेन बद्धंदाम्ना च गौर्य धा ।। ६४

स च नामप्रपंचस्तु चतुर्धा ऽभिद्यते किल ।।
ध्वनिर्वर्णाः पदं वाक्यमित्यास्पद चतुष्टयम् ।। ६५

[1]तत्र ध्वनिनर्दिमयो वर्णाश्च्वाकार पूर्वकाः ।।
पदं श ब्दमि [2] ति प्रोक्तं वाक्यं चेति शर्वि भजेत् ।। ६६

तच्चापि वाक्यं त्रिविधं भवेदिति श्रुतेर्मतम् ।।
प्रभुसम्मतमेकं च सुत्दत्संगमतमेव च ।। ६७

कांतासंमतमेवापि वाक्यं हि त्रिविधं विदुः[3] ।।
प्रभुः स्वामी यथा भृत्यमादिश त्येतदाचर ।। ६८

तथा श्रुतिस्मृति चोभे प्राहतुः प्रभुसंमतम् ।।
इतिहास पुराणादि सुत्दत्संमतमुच्यते ।। ६९

सुत्दद्वत्प्रतिबोध्यैर्न प्रवर्तयति तत्त्वतः ।।
काव्यालापादिकं यच्च कांतासंमतमुच्यते ।। ७०

---

१ अ. 'तत्र........मयो' इदमर्ध लुप्तम् ।
२ ब. शिव मिति
३ ब. विदु

प्रभुवाक्यं स्मृतं यच्च सबाह्याभ्यंतरं शुचि ।।
सुत्दद्वाक्यं तथा शौचं पालयेत्स्वर्गकांक्षया ।। ७१

तदेतत्पालनीयं स्याद्भूमिजानां श्रुतिर्वदेत् ।।
त्वया नास्तिक्य वाक्येन चेदेतदभिधीयते ।। ७२

एतेन श्रुतिशास्त्राण्णि पुराणं च वृथैव किम् ।।
अग्रे सप्तर्षिपूर्वा ये ब्राह्मणाः क्षत्रिया भवन् ।। ७३

मुग्धा सर्वे भवन्दक्षा[१] यो हि वेदं गता ह्यन् ।।
तथा वेदांतवचनं सत्त्वस्था ह्यूर्ध्वगामिनः ।। ७४

तिष्ठंति [२]राजसा [३]मध्ये ~~ह्य~~ ह्यधो गच्छंति तामसाः ।।
सत्त्वाहारैः सत्त्ववृत्या स्वर्गगामी भवेत्ततः ।। ७५

न चैतदप्य सूयामो यद्भूतेषु शिवो न हि ।।
अस्त्येव सर्वभूतेषु ~~श्रूण्वन्नत्र~~ श्रूण्वत्राप्युपमानकम् ।। ७६

यथा सुवर्णजातानि भूषणानि बहूनि च ।।
कानिचिच्छुद्ध रूपाणि ~~च~~ हीनरूपाणि कानिचित् ।। ७७

---

१ अ. भवन्दक्षो ब. भवान् दक्षो
२-३ अ. मध्येराजसा

सवर्णं सर्वेषु चास्त्येव तथैव स सदाशिवः ।।
हीनरूपं शोधितं सच्छुद्धिमेति न चैकताम् ।। ७८

तथेदं शोधितं देहं शुद्धं दिवि व्रजेत्स्फुटम् ।।
तस्मात्सर्वात्मना हीनान्न ग्राह्यं ऽवत धीमता ।। ७९

चेदिदं शोधयेदेहं नैव ग्राह्यं समंततः ।।
सर्वतो यः प्रतिग्राही निहाराहारयोर्न च ।। ८०

शुचिः स्यादल्प दिवसात्पाषाणोऽसौ भवेत्सुफुटम् ।।
तस्मात्सर्वात्मना नैव ग्रहीष्येहं जलं स्फुटम् ।। ८१

साधुवाप्यथवाऽसाधु प्रमाणं नः श्रुतिः परा ।।
एवमुक्ते स च नरः प्रहसन्दक्षिणेन च ।। ८२

अंगुष्ठेन लिखन्भूमिं चक्रे गर्तं महोत्तमम् ।।
तत्र[1] चिक्षेपतत्तोयं तेन [2]गर्तः स्मपूरितः ।। ८३

अत्यरिच्यत तोयं च चक्रे पादेन संलिखन् ।।
चक्रे श्री सरः पूरितं चाप्यतिरिक्तजलेन तत् ।। ८४

---

१ अ. अत्र
२ ब. गर्तश्चार्पि पूरितः

तदद्भुतं महद्दृष्ट्वा नैव विप्रो विसिष्मिये ।।
यतो बहुविधं चित्रं भवेद्भूताद्युपासिषु ।। ८५

तच्चित्रेण न जह्याच्च श्रुतिमार्गं सनातनम् ।। ८६

नर उवाच ।।[1]
अतिमूर्खोसि[2] विप्रत्वं प्रज्ञावादांश्च भाषसे ।।
किं न श्रुतस्त्वया श्लोकः पुराविद्भिरुदीरितः ।।
कूपोन्यस्य घटोऽन्यस्य रज्जुरन्यस्य भारत ।। ८७

पाययंत्यन्ये पिबंत्यन्ये सर्वे ते समभागिनः ।।
तज्जलं मम कस्मात्त्वं धर्मज्ञो न पिबस्यसि ।। ८८

नारद उवाच ।।[3]
ततो विममृशे श्लोको बहुधा समभागिनाम् ।।
अनिश्चयाद्विचार्यासौ घटाद्यैः समभागिता ।। ८९

बहुपीतद्रव्यक्षेपः सर्वैः सा समभागिता ।।
एवं कर्तुः फलैः सर्वैः समं स्याच्च[4] पुनःपुनः ।। ९०

यः शुचिश्च शिवं ध्यायन्प्रासाद कूप कर्तरि ।।
जलप्रतिग्रहा[5] भावात्पिबतोऽस्य समं फलम् ।। ९१

---

१ अ. नर ।।
२ अ. मूर्षोसि
३ अ. प्रतौ इत्ययं पाठः नास्ति ।
४ अ. प्रतौ 'पुनः२' इति स्यात्
५ ब. तवप्रतिग्रहान्

इति निश्चित्य प्रोवाच कालभीतिर्नरं च तम् ।।
सत्यमेतत्किं तु कुंभपयसा गर्त पूरणे ।। ९२

दृष्ट्वा प्रत्यक्षतो[1] मादकृकथं पिबति भो वद ।।
साधु वाप्यथवा साधु न पिबेयं कथंचन् ।। ९३

एवं विनिश्चयं दृष्ट्वास्य स्थिरं कुरुनंदन ।।
पुरुषौसौ प्रहस्यैव क्षणादंतर्दधे ततः ।। ९४

कालभीतिश्च परमं विस्मयं समुपागतः ।।
वृत्तांतः कोयमित्येव चिंतयामास भूयसा[2] ।। ९५

*[3]ततश्चिंतस्तस्य बिल्वाधस्तात्सुशोभनम् ।।
उच्छ्रितं सुमहालिंगं पृथिव्या द्योतयद्दिशः ।। ९६

प्रादुर्भावे ततस्तस्य महालिंगस्य भारत ।।
ननर्त ह्यप्सरोवृंदं गंधर्वाललितं जगुः ।। ९७

[4]पारिजातमयीं पुष्पवृष्टिमिंद्रो मुमोच ह ।।
जयेति देवा मुनयस्तुष्टुवुर्विविधैः[5] स्तवैः ।। ९८

---

१ ब. ते

२ अ. भूयशः

*३ अ. प्रतौ श्लोकं नास्ति । (तत.... द्योतयद्दिशः)

४ ब. परिजात

५ ब. विधै

तस्मिन्महति कौरव्य वर्तमाने महोत्सवे ।।
कालभीतिः प्रमुदितः[1] प्रणम्य स्तोत्रमैरयत् ।। ९९

पापस्यकालं भवपंककालं कलाकलं कालमार्गस्य कालम् ।।
देवं महाकालमहं प्रपद्ये श्रीकालकंठं भवकालरूपम् ।। १००

ईशान वक्त्रं[2] प्रणमामि त्वाहं स्तौति श्रुतिः सर्वविद्येश्वरस्त्वम् ।।
भूतेश्वरस्त्वं प्रपिता महस्तवं तस्मै नमस्तेस्तु महेश्वराय ।। १०१

यं स्तौति वेदस्तमहं प्रपद्ये तत्पुरुषसंज्ञं शरणं द्वितीयम् ।।
त्वां विद्महे तच्च नस्त्वं प्रदेहि श्री रुद्रदेवेश नमोनमस्ते ।। १०२

अघोरवक्त्रं त्रितयं प्रपद्ये अथर्वजुष्टं तवरूपकाणि ।।
अघोरघोराणि च घोरघोराण्यहं सदा नौमि भूतानि तुभ्यम् ।। १०३

चतुर्थवक्त्रं च सदा प्रपद्ये सद्योभिजाताय नमो नमस्ते ।।
भवेभवेनादिभवो भवस्य भवोद्भवो मां शिव तत्र तत्र ।। १०४

बलंकरायापि[3] बलप्रमाथिने भूतानि हंत्रे च मनोन्मनाय ।। १०५

---

१ अ. प्रती नास्ति ।
२ अ. ईशावक्त्रं ब. इशान वक्त्रां
३ ब. प्रती 'यापि' नास्ति ।

त्रियंबकं त्वां च यजामहे वयं सुपुष्प्य गंधिः शिपुष्टिवर्धनम् ।।
उर्वारुकं पक्वमिवोग्रबंधनाद्रक्षस्व मां त्र्यंबक मृत्युमार्गात् ।। १०६

षडक्षरं मंत्रवरं तवेश जपंति ये मुनयो वीतरागाः
तेषां प्रसन्नोऽसि जपामहेतं त्वोंकारपूर्वं च नमः शिवाय ।। १०७

एवं स्तुतो महादेवो लिंगाग्निः सुत्य भारत ।।
त्रिजगद्द्योतयन्भासा प्रत्यक्षः[1] प्राह च[2] द्विजम् ।। १०८

यत्त्वयात्रा महातीर्थे भृशमाराधितो द्विज[3] ।।
तेनाति तुष्टस्ते वत्स नेशः[4] कालः कथंचन ।। १०९

अहं च नररूपी यो दृष्ट्वा ते धर्मसंस्थितिम् ।।
धन्यस्तद्धर्म मार्गोऽयं पालयते यद्भवद्विधैः ।। ११०

सर्वतीर्थोदकैर्गर्तैः पूरितो मे सरस्तथा ।।
जलमेतन्महापुण्यं त्वदर्थं मे समाहृतम् ।। १११

सप्तमंत्ररहस्य च यत्कृतं स्तवनं मम ।।
अनेन पठयमानेन सप्तमंत्राफलं भवेत् ।। ११२

---

१ ब. प्रत्यक्ष
२ अ. प्रतौ 'तं' पाठः ।
३ ब. द्विजं
४ ब. नैशः

अभीष्टं च वरं मत्ता वृणीष्व मनसेप्सितम् ।।
त्वयातितोषितो ह्यस्मिनादेयं विद्यते तव ।। ११३

कालभीतिरुवाच ।।[1]
धन्योऽस्म्यनुगृहीतोऽस्मि यत्त्वं तुष्टोऽसि शंकर ।।
त्वत्तोषात्सफला धर्माः श्रमायैवान्यथामताः ।। ११४

यदि तुष्टोऽसि सांनिध्यं लिंगेऽत्र क्रियतां सदा ।।
अक्षयं तत्कृतं चास्तु यल्लिंगे क्रियतेत्र च ।। ११५

जपतो यत्फलं देव पंच मंत्रायु तेन च ।।
तत्फलं जायतां[2] नृणामस्य[3] लिंगस्य दर्शने ।। ११६

कालमार्गादिहं यस्मान्मो चितोऽहं महेश्वर ।।
महाकालमिति ख्यातं लिंगं तस्माद्भव त्विदम् ।। ११७

अस्मिन्कूपे यो मर्त्यः स्नात्वा तर्पयते पितृन् ।।
सर्वतीर्थफलं चास्तु पितृणामक्षया गतिः ।। ११८

इति तस्य वचः श्रुत्वा प्रीतस्तं शंकरोऽब्रवीत् ।।
[4]स्वायंभुवं यत्र लिंगं तत्र नित्यं वसाम्यहम् ।। ११९

---

१ अ. [illegible] कालभीति ।।
२ ब. जायते
३ ब. नृणां
४ ब. स्वयं

स्वयंभुबाणरत्नोत्थ धातुपाषाण लोहजम्[1] ।।
लिंगं क्रमेण फलदमंत्यात्पूर्वं दशोत्तरम् ।। १२०

आकाशे तारकालिंगं पाताले हाटकेश्वरम् ।।
स्वायंभुवं धरापृष्ठे तदेतत्त्रितयं समम्[2] ।। १२१

विशेषात्प्रार्थितं यच्च तच्च सर्वं भविष्यति ।।
अत्र पुष्पं फलं पूजा नैवेद्यं स्तवनक्रिया ।। १२२

दानं चान्यच्च यत्किंचिदक्षयं तद्भविष्यति ।।
माघासितचतुर्दश्यां शिवयोगे च पुत्रक ।। १२३

लिंगाच्च पूर्वतः कूपे स्नात्वा यस्तर्पयेत्पितृन् ।।
सर्वतीर्थफलावाप्तिः पितृणां चाक्षया गतिः ।। १२४

तस्यां रात्रौ महाकालं यामेयामे प्रपूजयेत् ।।
यः क्षिपेत्सर्वलिंगेषु स जागरफलं लभेत् ।। १२५

जितेंद्रियश्च यो नित्यं मां लिंगेत्र प्रपूजयेत ।।
भुक्तिमुक्ति न दूरस्थे तस्य नित्यं द्विजोत्तम[3] ।। १२६

---

१ अ. लेपजं
२ अ. ब. स्मृतं
३ ब. मः

माघे[१] चतुर्दश्यष्टम्यां सोमवारे च पर्वणि ।।
स्नात्वा सरसि योऽभ्यर्च्य लिंगमेतच्छिवंव्रजेत् ।। १२७

दानं तपो रुद्रजापः सर्वमक्षयमेव च ।।
त्वं च नन्दी द्वितीयो मे प्रतीहारो भविष्यसि ।। १२८

कालमार्गजयाद्भूत्स महाकालमिधश्विवरम् ।।
करंधमोऽत्र राजर्षिरचिरादागमिष्यति ।। १२९

तस्य प्रोच्य भवान्धर्मास्ततो मल्लोकमाव्रज ।।
इत्युक्त्वा भगवान्रुद्रो लिंग मध्ये न्यलीयत ।। १३०

महाकालोऽपि मुदितस्तत्र तेपे महत्तपः ।। १३१

इति महाकाल प्रादुर्भावः ।। *२
नारद उवाच ।।[३]
अथ केनापिकालेन पार्थ राजा करंधमः[४]।।
विशेषाभिच्छुर्धर्मेषु श्रुत्वा तीर्थ महागुणान् ।। १३२

महाकाल चरित्रं च तत्रैव समुपाययौ ।।
महीसागरतोयेऽसौ स्नात्वा लिंगान्यथार्चयत् ।। १३३

---

१ अ. प्रतौ नास्ति ।
*२ ब. इति श्री स्कंदपुराणे कुमारिकाखंडे कालप्रादुर्भावे चत्वारिंशोऽध्यायः।।
ब. प्रतौ समाप्तोऽध्यायोऽत्र परंतु मुद्रित पुस्तके (अध्याय) सातत्यम् ।।
३ अ. 'श्री नारद' ।। इति पाठः ।।
४ ब. करंधसः

महाकालमनुप्राप्य परमां प्रीतिमागतः ।।
स पश्यन्सुमहालिंगं नातृप्यत जनेश्वरः ।। १३४

यथा दरिद्रः कृपणो निधिकुम्भमवाप्य च ।।
सफलं जीवितं मेने महाकालं निरीक्ष्य सः ।। १३५

पंचवर्षत्रायुतजपफलं यस्येह दर्शनात् ।।
ततः सपर्ययाभ्यर्च्य महत्यासौ प्रणम्य च[1] ।। १३६

श्रुत्वा च लिंगप्रवरं महाकालमुपासदत् ।।
ततो रुद्रवचः स्मृत्वा महाकालः स्मयन्निव ।। १३७

प्रत्युद्गम्य नृपं पूजामर्घं च प्रत्यपादयत् ।।
ततः कुशलप्रश्नादि कृत्वा शांतमुखं[2] नृपः ।। १३८

महाकालमुपामंत्र्य कथांते वाक्यमब्रवीत् ।।
भगवन्संशयो मह्यं सदा(यं परिवर्तते ।। १३९

यदिदं[3] तर्पणंनाम पितृणां क्रियते नृभिः ।।
जलमध्ये जलं याति कथं तुप्यंति पूर्वजाः ।। १४०

---

१ ब. प्रतौ 'च' नास्ति ।
२ अ. सानः
३ अ. तदिदं

एवं पिंडादिपूजा च सर्वमत्रैव दृश्यते ।।
कथमेवं स्ममन्यामः पित्रादिरूप भुज्यते ।। १४१

न चैत्रदस्ति यत्तेषां नोपतिष्ठति किंचन ।।
स्वप्ने यथाऽक्रम्य नरं दृश्यंते याचकाश्च ते [१] ।। १४२

देवानां चापि दृश्यंते प्रत्यक्षाः प्रत्ययाः सदा ।।
तत्कथं प्रतिगृह्णातन्ति मनो मे त्र प्रमुह्यति ।। १४३

महाकाल उवाच ।। [२]
योनिरेवं विधा तेषां पितृणां च दिवौकसाम् ।।
दूरोक्तं दूरपूजा च दुरस्तु तिरथापि यत् ।। १४४

भव्यं भूतं भविष्यच्च सर्वं जानंति यांति च ।।
पंचतन्मात्ररूपं च मनोबुद्धिरहंजडाः ।। १४५

नवतत्त्वमयं देहं दशमः पुरुषो मतः ।।
तस्माद्गंधेन तुष्यंति रसतत्वेन ते तथा ।। १४६

शब्दतत्वेन तुष्यंति स्पर्शतत्त्वं च गृह्णते ।।
शुचि दृष्ट्वा च तुष्यंति नात्र राजन्भवेन्मृषा ।। १४७

---

१ अ. `त/
२ अ. महाकाल ।। ब. श्री महाकाल उ० ।।

यथा तृणं पशूनां च नराणाममन्नमुच्यते ।।
एवं दैवतयोनीनामन्न सारस्य भोजनम् ।। १४८

शक्तयः सर्वभावानामचिंत्या ज्ञानगोचराः ।।
तस्मात्तत्वं प्रगृह्णान्ति शेषमत्रे वदृश्यते ।। १४९

करंधम उवाच ।।[१]
पितृभ्यो दीयते श्राद्धं स्वकर्म वशगाश्च ते ।।
स्वर्गस्था नरकस्था वा कथं तैरूप भुज्यते ।। १५०

अथ स्वर्गेथ नरके स्थिताः कर्माभियंत्रिताः ।।
शक्नुवंति वशनैतान्दातुं ते चेश्वराः कथम् ।। १५१

आयुः प्रजां धनं विद्यां स्वर्गमोक्षं सुखानि च ।।
प्रयच्छन्तु तथा राज्यं प्रीता नृणां पितामहाः ।। १५२

महाकाल उवाच ।।[२]
सत्यमेतत्स्वकर्मस्थाः पितरो यन्नृपोत्तम् ।।
किं तु देवासुराणां च यक्षादीनाम् मूर्तकाः ।। १५३

मूर्ताश्चतुर्णां[३] वर्णानां पितरः सप्तधा स्मृताः ।।
[४]ते हि सर्वे प्रयच्छंति दातुं सर्वं यथेप्सितम् ।। १५४

---

१ अ. ब. 'करंधम' ।।
२ ब. प्रतौ 'उवाच' नास्ति (महाकालः)
३ अ. तुर्णं
४ ब. व हि सर्व

एकत्रिंशद्गणा येषां पितृणां प्रबला नृप ।।
कृतं च तदिदं श्राद्धं तर्पयेतान्परान्पितृन् ।। १५५

ते तृप्तास्तत्पर्यन्तयस्य पूर्वजान्यत्र संस्थितान् ।।
एवं स्वानं चोपतिष्ठेच्छ्राद्धं यच्छंति ते वरान् ।। १५६

राजोवाच ।।[१]
भूतादिभ्यो यथा विप्र नाम्नावोद्दिश्य दीयते ।।
सुरादीनां कथं चैवं संक्षेपेण न दीयते ।। १५७

इदं पितृभ्यो देवेभ्यो द्विजेभ्यः पावकाय च ।।
एवं कस्माद्विस्तराः स्युर्मनः कायादिकष्टदाः ।। १५८

महाकाल उवाच।।[२]
उचिता प्रतिपत्तिश्च कार्या सर्वेष्कु नित्यशः ।।
प्रतिपत्तिं चोचितां ते विना गृह्णन्ति नैव च ।। १५९

यथाश्वा गृहद्वारस्थो बलिं गृह्णाति किं तथा ।।
प्रधानपुरुषो राजन्गृह्णाति च शुना समः ।। १६०

एवं ते भूतवद्देवा न हि गृह्णान्ति कर्हिचित् ।।
शुचि कामं जुषंति न हविरश्रदधानतः ।। १६१

---

१ ब. राजा उ० ।।
२ अ. महाकाल ।। ब. श्री महाकाल उ० ।।

विना मंत्रैश्च यदत्तं न तद्गृह्णन्ति तेऽमलाः ।।
श्रुतिरप्यत्र प्राहिदं[1] मंत्राणां विषये नृप[2] ।। १६२

मंत्रा देवता यद्यद्विद्वान्मन्त्र वत्करोति देवताभिरेव ।।
तत्करोति यददाति देवताभिरेव तददाति ।।
तस्मान्नामन्त्रत्प्रति गृह्णीयात्ना मन्त्रवत्प्रतिपद्यते ।। १६३

तस्मान्मंत्रैः सदा देवं पौराणैर्वैदिकैरपि ।।
अन्यथा ते न गृहणन्ति भूतानामुपतिष्ठति ।। १६४

राजोवाच ।।[3]
दर्भास्तिलानक्षतांश्च तोयं चैतैः सुसंयुतम् ।।
कस्मात्प्रदीयते दानं ज्ञातुमिच्छामि कारणम् ।। १६५

महाकाल[4] उवाच ।।
पुरा किल प्रदत्तानि भूमैर्दानानि भूरिशः ।।
प्रत्यगृहणन्त दैत्याश्च प्रविश्याभ्यंतरं बलात् ।। १६६

ततो देवाश्च पितरः प्रत्यूचुः पद्मसंभवम् ।। १६७

स्वामिन्नः पश्यतामेव सर्वं दैत्यैर्[5] प्रगृह्यते ।।
विधेहि रक्षां तेषां त्वं न नष्टाः स्मोयथा वयम् ।। १६८

---

१ अ. प्राहेदं
२ ब. नृपः
३ अ. राजा ।। ब. राजा उवा० ।।
४ अ 'उवाच' नास्ति ।
५ ब. दैत्यै

ततो विमृश्यैव विधौ रक्षोपायम चीकरत् ।।
तिलैर्युक्तं पितृणां च देवानामक्षतैः सह ।। १६९

तोयं दर्भैश्च सर्वत्र एवं गृह्णन्ति नासुराः ।।
एतान्विना प्रदत्तं यत्फलं[1] दैत्यैः प्रगृह्यते ।। १७०

निःश्रुवस्य पितरो देवा यांति दातुः फल न हि ।।
तस्माद्युक्तेषु सर्वेषु दानमेवं प्रदीयते ।। १७१

करंधम उवाच ।।[2]
चतुर्युगव्यवस्थानं श्रोतुमिच्छामि तत्त्वतः ।।
~~महतीर्थं कृतयुगं विद्धि ततस्त्रेतायुगं स्मृतम्~~ ++
महतीर्थं विवित्सा मे सदैव परिवर्तते ।। १७२

महाकाल [3]उवाच ।।
आद्यं कृतयुगं विद्धि ततस्त्रेतायुगं स्मृतम् ।।
द्वापरं च कलिश्चेति चत्वारश्च समासतः ।। १७३

सत्वं कृतं रजस्त्रेता द्वापरं च रजस्तमः ।।
कलिस्तमस्तु विज्ञेयं युगवृत्तं युगेषु च ।। १७४

ध्यानं परं कृतयुगे त्रेतायां यज्ञ उच्यते ।।
वृत्तं च द्वापरे सत्यं दानमेव कलौ युगे ।। १७५

---

१ अ. ब. यत्फलां
२ अ. प्रतौ 'उवाच' नास्ति ।
३ अ. प्रतौ 'उवाच' नास्ति ।

कृते तु मनानसी सृष्टिर्वृत्तिः साक्षाद्रसोल्लासा ।।
तेजोमप्यः प्रजास्तृप्ताः सदानंदाश्च भोगिनः ।। १७६

अधमोत्तमौ न तासां ता निर्विशेषाः प्रजाः शुभाः ।।
तुल्यमायुः सुखं रूपं तासां[1] तस्मिन्कृते युगे ।। १७७

न चाप्रीतिर्न च द्वंद्वौ न द्वेषौ नापि चक्लमः ।।
पर्वतोदधिवासिन्यो ह्यनुक्रोश‿प्रियास्तुताः ।। १७८

वर्णाश्रमव्यवस्था च तदासीन्न हि शंकरः ।।
एकमन्यं न ध्यायंति परमं ते सदा शिवम् ।। १७९

चतुर्थे च ततः पादे नष्टा सा(भूद्रसोल्लासा ।।
प्रादुरा संस्ततस्तासां वृक्षाश्च गृह‿संज्ञिताः ।। १८०

वस्त्राणि च प्रसूयंते फलान्या[2]भरणानि च ।।
तेष्वेव जायते तासां गंधवर्णरसान्वितम् ।। १८१

[3]सुमाक्षिकं महावीर्यं [4]पुटके पुटके मधु ।।
तेन ता वर्तयंति स्म कृतस्यांते प्रजास्तदा ।। १८२

---

१ अ. ब. 'तस्यां'

२ अ. भरणनानि

३ अ. प्रतौ 'अमाक्षिकं'

४ अ. पुटके '२' इतिस्यात् ।

त्दृष्टपुष्टास्तथा वृद्धाः प्रजा वै विगतज्वराः ।।
ततः कालेन केनापि तासां वृद्धे रसेन्द्रिये ।। १८३

युगभावात्तथा ध्याने स्वल्पीभूते शिवस्य च ।।
वृक्षांस्तान्पर्य गृह्णंश्च मधु वा माक्षिकं[१] बलात् ।। १८४

ततस्तां तेनोपचारेण लोभदोषकृतेन वै ।।
प्रनष्टा मधुना सार्धं कल्पवृक्षाः क्वचित्क्वचित्[२] ।। १८५

तस्यां चाप्यल्प शिष्टायां द्वंद्वान्यभ्युत्थितानि वै ।।
शीतातपैर्मनो दुःखैस्ततस्ता वृक्षे दुःखिता भृशम् ।। १८६

चक्रुरावरणार्थं हि केतनानि ततस्ततः ।।
ततः प्रादुर्बभौ तासां सिद्धिस्त्रेतायुगे पुनः ।। १८७

वृष्टया बभूवुरोषध्यो ग्राम्यारण्याश्चतुर्दश ।।
अकृष्टपच्याश्चा नूप्तास्तोय भूमि समागमात् ।। १८८

ऋतुपुष्पफलैश्चैव वृक्षागुल्माश्च जज्ञिरे ।।
तैश्च वृत्तिरभूत्तासां धान्यैः पुष्पैः फलैस्तथा ।। १८९

---

१ ब. कां

२ अ. 'क्वचित - २' ।।

ततः पुनरभूत्तासां रागो लोभश्च सर्वतः ।।
कालवीर्येण वा गृह्य नदी[1]क्षेत्राणि पर्वतान् ।। १९०

वृक्षगुल्मौषधीश्चैव प्रसह्याशु यथाबलम् ।।
विपर्ययेण चौषध्यः प्रनष्टाश्च चतुर्दश ।। १९१

नत्वा धरां प्रविष्टास्ता औषध्यः [2]पीडिताः प्रजाः ।।
दुदोह गां पृथुर्वैन्यः सर्वभूतहिताय वै ।। १९२

तदा प्रभृति चौषध्यः [3]फालकृष्टाः प्रजास्ततः ।।
वार्त्तया वर्तयंति स्म पाल्यमानाश्च क्षत्रियैः ।। १९३

वर्णाश्रमप्रतिष्ठा च यज्ञस्त्रैतासु[4]चोच्यते ।।
सदाशिवध्यानमयं त्यक्त्वा मोक्षमचेतनाः ।। १९४

पुष्पितां वाचमाश्रित्य रागात्स्वर्गम साधयन् ।।
द्वापरे च प्रवर्तंते मतिभेदास्ततो नृणाम् ।। १९५

मनसा कर्मणा वाचा कृच्छ्राद्वार्ता प्रसिध्यति ।।
लोभोऽधृतिः शिवं त्यक्त्वा धर्माणां संकरस्तथा ।। १९६

---

१ अ. ब. नदीः
२ अ. औषधीः ब. औषध्या
३ अ. फल
४ अ. प्रोच्यते ।।

वर्णाश्रम परिध्वसाः प्रवर्तंते च द्वापरे ।।
तदा व्यासैश्चतुर्द्धा च व्यस्यते द्वापरात्ततः ।। १९७

एको वेदश्चतुष्पादैः क्रियते द्विजहेतवे ।।
इतिहास पुराणानि भिद्यंते लोक[1]गौरवात् ।। १९८

ब्राह्मं वाद्मं वैष्णवं च शैवं भागवतं तथा ।।
तथान्यन्नारदीयं च मार्कंडेयं च सप्तमम् ।। १९९

आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं स्मृतम् ।।
दशमं ब्रह्मवैवर्तं लैंगमेकादशं तथा ।। २००

वाराहं द्वादशं च चैव स्कांद चैव त्रयोदशम् ।।
चतुर्दशं वामनं च कौर्मं[2] पंचदशं स्मृतम् ।। २०१

मात्स्यं षोडशकं प्रोक्तं गारुडं च ततः परम् ।।
अतः परं तु ब्रह्मांडमेवंचाष्टादशानि हि[3] ।। २०२

अस्मिन्वाराह[4]कल्पे च व्यासानाकर्णयस्व च ।।
ऋतुः सत्यो भार्गवश्च अंगिराः सविता तथा ।। २०३

---

१ अ. लोग
२ अ. कौर्मं
३ अ. प्रतौ 'च' पाठः ।
४ ब. कल्पेन

मृत्यु: शतक्रतुर्धीमान्वसिष्ठो भविताऽधुना ।।
सारस्वतस्त्रिधामा च वेदवित्रिवृतो मुनिः ।। २०४

शत तेजा:[१] स्वयं विष्णुर्नारायण इति स्मृत: ।।
करकश्चारुणिर्धीमांस्तथा देव ऋतंजय: ।। २०५

कृतंजयो[२] भरद्वाजो गौतम: कविसत्तम: ।।
वाजश्रवा मुनिश्चैव तथा युष्मायणो मुनिः ।। २०६

तृणबिंदुस्तथा ऋक्ष: शक्ति: पाराशरस्तथा ।।
जातूकर्ण्योथ विष्णुश्च स्वयं द्वैपायनो मुनिः ।। २०७

अश्वत्थाममुखाश्चैते भविष्या: सूचितास्तव ।।
धर्मशास्त्राणि लोकार्थं भिद्यंते चापि द्वापरे ।। २०८

मन्वत्रिविष्णुहारीत याज्ञवल्क्योशनो गिरा: ।।
यमापस्तंब संवर्तो: कात्यायन बृहस्पती[३] ।। २०९

पराशरव्यास शंख लिखिता दक्ष गौतमौ ।।
शातातपो वसिष्ठश्च धर्मशास्त्र प्रयोजका: ।। २१०

---

१ अ. शेजा:

२ अ. ऋतंजयो

३ अ. बृहस्पती: । ब. बृहस्पति ।

ततो द्वापरसंध्यायां प्रवर्तति कलौ युगे ।।
नश्यमाने शिवयोगे[1] जायंते योगनंदनाः[2] ।। २११

आद्ये श्वेतकलौरुदः सुतारस्तारणस्तथा ।।
सुहोत्रः कंकणाश्चैव लोकाख्यश्च महामुनिः ।। २१२

जैगीषव्यश्च भाव्यो वै भगवान्दधिवाहनः ।।
ऋषभश्च मुनिर्धर्म उग्रश्चवातिः सबालकः[3] ।। २१३

गौतमो वेदशीर्षश्च गोकर्णश्च शिखंडिभृत् ।।
गुहावासी जटामाली अट्टहासश्च दारुणः ।। २१४

लांगली संयमी शूली डिंडी [4]जुण्डीश्वरः स्वयम् ।।
सहष्णुः सोमशर्मा च लकुलीशश्च पार्थिव ।। २१५

कायावरोहणो भावीत्याद्या योगेश्वराः क्रमात् ।।
एते संक्षिप्य वक्ष्यंति शिवधर्मं कलौ युगे ।। २१६

एवं कलियुगे राजंछास्त्र संक्षेप उच्यते ।।
श्रृणु तिष्यप्रवृत्तिं च हर्षोद्वेगकरीं किल ।। २१७

---

१ ब. शिव योगे

२ ब. नंदनः

३ 'सुबालिकः' अ. ब. पाठः ।

४ अ. तुं

तिष्ये मायामसूयामं च वधं चैव तपस्विनाम् ।।
साधयंति नरास्तत्र तमसा व्याकुलेंद्रियाः ।। २१८

कलौ प्रमायको[1] रागः[2] सततं क्षुद्‌भयानि च ।।
अनावृष्टिभयं घोरं देशानां च विपर्ययः ।। २१९

न प्रमाणं[3] श्रुतेरस्ति नृणां चाधर्मसेवनात् ।।
अधार्मिकास्त्वनाचारा महाकोपाल्प तेजसः ।। २२०

अनृतं ब्रुवते लुब्धा नारीप्रायाश्च दुष्प्रजाः ।।
दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ।। २२१

विप्राणां कर्मदोषैश्च प्रजानां जायते क्षयः ।।
उत्सीदंति क्षत्रविशो वर्धंते शूद्रविप्रकाः ।। २२२

शूद्रा विप्रैः सहासंते शयनासन भोजनैः ।।
शूद्राश्च ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः ।। २२३

राजवृत्त्यां स्थिताश्चौराश्चौरा चाराश्च पार्थिवाः ।।
एकपत्न्यो न शिष्यंति वर्धयंत्यभि सारिकाः ।। २२४

---

१ ब. प्रमारको
२ अ. रोगः
३ अ. प्रमाणे

तदाह्यल्पफला भूमिः क्वचिच्चापि महाफला ।।
अरक्षितारो हर्तारो राजानः पापनिर्भयाः ।। २२५

अक्षत्रियास्तु राजानो विप्राः शूद्रोपजीविनः ।।
शूद्रा विवादिनः सर्वे ब्राह्मणैरभिनंदिताः ।। २२६

आसनस्थान्द्विजान्दृष्ट्वा चलंत्यत्यल्प बुद्धयः ।।
आस्ये निधाय वै हस्तं कर्णे शूद्रस्य च द्विजाः ।। २२७

नीचस्यापि तदा वाक्यं वक्ष्यंति विनयेन तम् ।।
उच्चासनस्थांछूद्रांश्च द्विजानां पश्यतामपि ।। २२८

ज्ञात्वा न हिंसते राजा[१] पश्यकालबलं नृप ।।
पुष्पैः शुभसितैश्चैव तथान्यैर्मंडनै द्विजाः ।। २२९

शूद्रानभ्य र्चयंत्यल्पश्रुत भाग्यबलान्विताः ।।
पाषंडिनां च गृह्णंति ब्राह्मणाः कुप्रतिग्रहम् ।। २३०

येन ते रौरवं [२]यांति सुदुस्तारं द्विजाधमाः ।।
तपोयज्ञफलानां च विक्रेतारो द्विजास्तथा ।। २३१

---

१ ब. राज्ञाः
२ ब. 'यांति......धमाः'। श्लोकार्धं लुप्तम् ।।

यतयश्च भविष्यंति बहवः कोटिशः कलौ ।।
पुरुषाल्प बहुस्त्रीको नृणां चापत्य संभवः ।। २३२

निंदंति वेदवाक्यानि वेदार्थांश्च कलौ युगे ।।
*[1]शूद्रैः स्वयं निर्मितं यत्प्रमाणं शास्त्रमेव तत् ।। २३३

श्वापदप्रबलत्वं च गवां चापि परिक्षयः ।।
कस्यचिदानप्रभुति [2]धर्मस्यास्ति न शुद्धता ।। २३४

साधूनां बहवो नाशाः पार्थिवाश्चाप्य रक्षिणा ।।
अट्टशूला जनपदाः [3]शिवशूलाश्चतुष्पथाः ।। २३५

प्रमदाः केशशूलिन्यो भविष्यंति कलौ युगे ।।
स्त्री प्रधानानि गेहानि कुचैलास्ताश्च कर्कशाः ।। २३६

बहुभक्ष्यावलिप्ताश्च[4] कृत्या इव भवंति च ।।
सर्वे वणिग्जनाश्चापि चित्रवर्षा च वासवः ।। २३७

कुशीलचर्यापाखंडैर्वृथा रूपैः समावृतः ।।
बहुयाचनको लोको भविष्यति परस्परो ।। २३८

---

* १ अ. 'शूद्रैः........तत्' इत्ययं पाठः त्रुटितं ।
२ अ. 'धर्म..... शुद्धता' । श्लोकार्धं नष्टः ।
३ अ. 'शिव...... प्रथा' । श्लोकार्धं नष्टः ।
४ अ. 'बहु...... ताश्च' पर्यन्तं त्रुटितं ।

अशंकश्चैव पापेषु तदा लोको[1] भविष्यति ।।
हर्तारः पररत्नानां परदारप्रघर्षकाः ।। २३९

ऊनषोडशवर्षाश्च प्रजायंते युगक्षये ।।
तथा द्वादशवर्षाश्च प्रसवंति स्त्रियस्तदा ।। २४०

चौराश्चौरस्य हर्तारो हर्तुर्हर्ता तथापरः ।।
ज्ञान कर्मण्युपरते लोके निष्क्रियतां गते[2] ।। २४१

कीट–मूषक–सर्पाश्च घर्षयिष्यंति मानवान् ।।
वर्णाश्रमाणां ये चान्ये पाषंडाः परिपंथिनः ।। २४२

ते तदा प्रोद्भविष्यंति तेषां वृद्धिश्च पार्थिव ।।
दुःख पुत्रकलत्राद्यं देहोत्सादः सरोगता ।। २४२

अधर्माभिनिवेशत्वात्तमसो जायते कलौ ।।
कलेर्दोषनिधेश्चैव शृणुष्वैवं महागुणम् ।। २४४

तदाल्पेनैव काले न सिद्धिं गच्छंति मानवाः ।।
त्रियुगीना वदंत्येवं धन्या धर्मं चरंति ये ।। २४५

---

१ ब. लोका

२ अ. ब. गताः

श्रुतिस्मृति पुराणोक्तं कलौ श्रद्धा परायणाः ।।
त्रेतायां वार्षिको धर्मो द्वापरे मासिकः स्मृतः[१] ।। २४६

यथा क्लेशं चरन्प्राज्ञस्तदह्ना प्राप्यते कलौ ।।
युगत्रयेण तावंतः सिद्धिं गच्छंति पार्थिवः ।। २४७

~~यावंतः सिद्धिमायांति कलौ / यच्च भावि तत्वं निबोध मे~~ ++
यावंतः सिद्धिमायांति कलौ हरिहरव्रताः ।।
अष्टाविंशे कलौ यच्च भावि तत्वं निबोध मे ।। २४८

त्रिषु वर्षसहस्त्रेषु कलेयतिषु पार्थिवः[२] ।।
त्रिशतेषु दशन्यूनेष्वस्यां भुवि भविष्यति ।। २४९

शूद्रकोनाम वीराणामधिपः[३] सिद्धिमत्र[४] सः ।।
चर्चितायां समाराध्य [५]लप्स्यते भूभरापहः ।। २५०

ततस्त्रिषु सहस्त्रेषु दशाधिक शतत्रये ।।
भविष्यं नंदराज्यं च चाणक्यो यान्हनिष्यति ।। २५१

शुक्लतीर्थ सर्वपाप निर्मुक्तिं यो/भिलाप्स्यति ।।
ततस्त्रिषु सहस्त्रेषु विंशत्या चाधिकेषु च ।। २५२

---

१ ब. स्मृतम्
२ अ. 'व'
३ ब. वाराणामधिपः
४ ब. मात्र
५ अ. लि

भविष्यं विक्रमादित्यराज्यं सोऽथ प्रलप्स्यते ।।
सिद्धिप्रसादा दुर्गाणां दीनान्यो ह्युद्धरिष्यति ।। २५३

ततः शतसहस्त्रेषु शतेनाप्यधिकेषु च [1] ।।
शकोनाम भविष्यश्च योऽतिदारिद्र्यहारकः ।। २५४

ततःस्त्रिषु सहस्त्रेषु षट्शतैरधिकेषु च ।।
मागधे हेमसदना दंजन्यां प्रभविष्यति ।। २५५

विष्णोरंशो धर्मपाता बुधः साक्षात्स्वयं प्रभुः ।।
तस्य कर्माणि भूरिणि भविष्यंति महात्मनः ।। २५६

ज्योतिर्विंदु मुखानुग्रान्स हनिष्यति कौटिशः ।।
चतुः षष्टिं स वर्षाणि भुकत्वा द्वीपानि सप्त च ।। २५७

भक्तेभ्यः स्वयशो मुकत्वादिवं पश्चादुगमिष्यति ।।
सर्वेषां चावताराणां गुणैः समधिको मतः ।। २५८

ततो वक्ष्यंति तं भक्त्या सर्वपापहरं बुधम् ।।
चतुर्षु [2] च सहस्त्रेषु शतेष्वपि चतुर्षु च ।। २५९

---

१ ब. प्रती 'च' नास्ति ।
२ ब. चतुः

साधिकेषु महान्राजा प्रमितिः प्रभविष्यति ।।
ग्रीत्रेषु वै चंद्रमसो बहुसेनापतिर्बली ।। २६०

म्लेच्छान्स कोटिशोहत्वा पाषंडानि च सर्वशः ।।
वैदिकं केवलं शुद्धं सद्धर्मं वर्तयिष्यति ।। २६१

गंगायमुनयोर्मध्ये निष्ठां[1] यास्यति पार्थिवः[2] ।।
ततः प्रजाश्च काले न केनापि भृशपीडिताः ।। २६२

घोरं वा धर्ममाश्रित्य शाठ्येन च भवंति ताः[3] ।।
अपग्रहास्ततस्ता वै लोभाविष्टाश्च वृंदशः ।। २६३

उपहिंसंति चान्योन्यं व्याकुलाः श्रमपीडिताः ।।
नष्टे श्रौते तथा स्मार्ते ~~निस्स्नेहा निरपत्रपाः~~
परस्परहतास्तदा ।। २६४

निर्मर्यादा निष्करुणा निस्स्नेहा निरपत्रपाः ।।
गृहदाराणि संत्यत्य हूनस्वकाः पंचविंशतिः ।। २६५

हाहाभूताश्चरिष्यंति विषादव्याकुलेंद्रियाः ।।
अनावृष्टि हताश्चैव वार्तामुत्सुज्य दुःखिताः ।। २६६

---

१ अ. निष्टा

२ ब.अ. पार्थिव

३ ब. ता

प्रत्यंतांस्ता निषेवंति हित्वा जनपदान्स्वकान् ।।
सरित्सागर कूलांश्च सेवंति पर्वतांस्तथा ।। २६७

शाकमूलफलैश्चैव वर्तयंति सुदुःखिताः ।।
चीरपत्राजिनधरा निष्क्रिया[1] निष्परिग्रहाः ।। २६८

धर्मस्यवासमात्रं च शाल्वो म्लेच्छो हनिष्यति ।।
उत्तमाधममध्यत्वं सर्वमुच्छिद्य[2] घोरकृत् ।। २६९

ततस्तस्य वधार्थाय विष्णुः साक्षाज्जगत्पतिः ।।
शंभले विष्णुयशसो भूत्वा पुत्रो नृपोत्तम् ।। २७०

द्विजोत्तमैः परिवृतः शाल्वं[3] तं संहरिष्यति ।।
कोटिशोऽर्बुदशः पापान्निहत्य च निखर्वशः[4] ।। २७१

पालयिष्यति तं धर्मं यो धर्मः श्रुतिपूर्वकः ।। २७२

कृत्वा पोतं धर्मरूपं साधूनां परमेश्वरः ।।
गमिष्यति परं लोकं कृत्वा कर्माणि भूरिशः ।। २७३

---

१ अ. निष्क्रियानिः
२ ब. कुर्त
३ अ. साल्वं
४ अ. निष्वर्वशः

ततः कृतयुगं भूयः प्रवर्तिष्यति पार्थिव ।।
आद्यं कृतयुगं चान्यं तदन्येभ्यो विशिष्यते ।। २७४

अष्टाविंश[1] कलिश्चैव शेषः[2] प्रावर्ते अन्यतः ।।
ततः कृते सूर्यवंशः सोमवंशः प्रवत्स्यति ।। २७५

मरुराजाच्च देवापिः श्रुतदेवाच्च ब्राह्मणाः ।।
इति चातुर्युगी राजन्व्यवस्था परिवर्तते ।।
चतुर्युगे च ते धन्या ये भजंति हराच्युतौ ।। २७६

*३ इति श्री स्कांदे ...... महाकाल करन्धमसंवादे चतुर्युग व्यवस्था वर्णनं -
- नाम चत्वारिंशत्तमोऽध्यायः ।।

---

१ अ. विंशः
२ अ. ब. शेषं
*३ अ. इति कुमारिकाखंडे युगव्यवस्था ।।
ब. मुद्रित पुस्तके समाप्तोऽध्यायोऽत्र
परंतु प्रतौ (अध्यायः) सातत्यम् ।।